## ५४. स्वादिष्टं भोजनम्

भोजनसम्बन्धिशब्दाः

पुत्रः - अम्ब ! महती बुभुक्षा भवति । शीघ्रं भोजनं परिवेषयतु ।

अम्बा - वत्स ! भोजनार्थं सर्वान् आह्वयतु ।

पुत्रः - सर्वे शीघ्रम् आगच्छन्तु ।

अम्बा - अद्य ओदनम्, सारः, व्यञ्जनं, क्वथितं, पर्पटः पायसम् च अस्ति ।

पुत्रः - अद्य कः विशेषः ?

अम्बा - अद्य रामनवमी भोः । अतः पायसं कृतवती ।

भगिनी - अम्ब अद्य व्यञ्जने लवणमेव न योजितवती । लवणं परिवेषयतु ।

अम्बा - अहो विस्मृतवती । स्वीकरोतु लवणम् ।

पुत्रः - अम्ब ! सारः कटुः अस्ति घृतम् आवश्यकम् ।

पतिः - जलजे ! क्वथितं परिवेषयतु । वृन्ताकस्य खलु क्वथितम् अतः खण्डाः मा सन्तु ।

अम्बा - वत्स ! पायसं कथमस्ति ?

पुत्रः - पायसं बहु स्वादिष्टम् अस्ति ।

भगिनी - पायसं रुचिकरं परं तक्रम् आम्लम् अस्ति । मम अवलेहः आवश्यकः ।

पतिः - तथैव जलमपि आवश्यकम् । अद्य व्यञ्जनं कोऽपि न खादति । यतः तत्र लवणमेव नास्ति ।

अम्बा - सावधानं भोजनं कुर्वन्तु । किम् आवश्यकम् ?

भगिनी - अद्य भोजनं तावत् सम्यक् नासीत् ।

पुत्रः - नहि अम्ब ! भगिनी असत्यं वदति । भोजनम् अतीव स्वदिष्टम् आसीत् ।